International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(3): 01-05
© 2019 IJSR
www.anantaajournal.com
Received: 01-03-2019
Accepted: 04-04-2019

**डा. गणेश ति.पण्डितः**
सहायकाचार्यः, शिक्षाशास्त्रविभागः
राजीवगान्धीपरिसरः, शृङ्गेरी,
कर्नाटक, भारत

Correspondence
**डा. गणेश ति.पण्डितः**
सहायकाचार्यः, शिक्षाशास्त्रविभागः
राजीवगान्धीपरिसरः, शृङ्गेरी,
कर्नाटक, भारत

# महाभारते सन्निहितमानवीयमूल्यानां समीक्षा

**डा. गणेश ति.पण्डितः**

## प्रस्तावना

अथ अमितबुद्धिना वेदव्यासेन विरचितम् अर्थशास्त्रधर्मशास्त्रमोक्षशास्त्रादिभिः विविधैः नामान्तरैः विख्यातं महदिदं च महाभारतं कालत्रयेऽपि प्रासङ्गिकतां भजते इत्यत्र नास्ति संशीतिः । त्रिष्वपि कालेषु प्रासङ्गिकतां भजमानमिदं ग्रन्थरत्नं त्रिभिर्वर्षैरेव महामुनिः रचयामास । गन्थरत्नेऽस्मिन् सर्वशास्त्रामृतं सङ्ग्रहेण सन्निविष्टमस्ति । "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्" इतीदम् आदिपर्वणः वाक्यम् आदौ संस्मृत्य महाभारते सन्निहितानां मानवीयमूल्यानां समीक्षणमस्मिन् शोधपत्रे सप्रमाणं क्रियते । महाभारते प्रोक्तानि उदाहृतानि च मानवीयमूल्यानि सर्वेषु देशेषु सर्वेषु कालेषु च प्राथम्यमर्हन्ति । तत्र हि मानवीयमूल्यानि आधारभूतमानवमूल्यानि (Basic Human Values) इत्येव सम्बोध्यन्ते । तन्नाम इमानि मूल्यानि मानवजीवनस्य आधारभूतानि सन्तीति तात्पर्यम् । एतानि आधारभूतानि मूल्यानि सत्यप्रेमशान्त्यहिंसाधर्मश्चेति पञ्च । हस्ते यथा पञ्च अङ्गुल्यः राजन्ते तथैव मूल्यपञ्चकमपि लोकेऽस्मिन् राजते। हस्तेन सुखेन च कार्यं संपादयितुं पञ्चानामपि अङ्गुलीनां परिपूर्णं योगदानं यथा अनिवार्यं तथैव सुसंस्कृतं सुखमयं च जीवनं यापयितुं इमानि पञ्च संख्याकानि मूल्यान्यपि अनिवार्याणि सन्ति । इमानि मूल्यानि परस्परं पूरकाणि सन्तीत्यतः विश्वस्यास्य सर्वेऽपि दार्शनिकाः एतेषाम् उपादेयतां विना विवादमभ्युपगच्छन्ति । आधुनिकाः अपि एतेषां विषये जनजागर्याम् उत्पादयितुं प्रयतमानाः सन्ति । अत एव आधुनिकेषु अपि पाठ्यक्रमेषु मूल्यशिक्षायै मूल्याधारितशिक्षायै च महन्महत्त्वं परिकल्प्यते । परन्तु मूल्यानां महत्त्वं स्वरूपं वैशिष्ट्यं च अस्मत्पूर्वजैः आबहोः कालात् प्रागेव सुस्पष्टं निरूपितमस्ति । किञ्च महाभारतादिषु महाकाव्येषु मूल्याधारितसमाजस्य मूल्यरहितसमुदायस्य च विशिष्टं वर्णनं कृतं वर्तते। अतः महाभारतादीनां महाकाव्यानाम् अनुसन्धानम् अनुदिनमवश्यं कर्तव्यमेव । विशिष्यमहाभारतस्य समीक्षणेन मानवीयमूल्यानां वास्तविकानि स्रोतांसि कानीति विज्ञातुं प्रभवामः । अतः क्रमशः पञ्चानामपि मानवीयमूल्यानां सम्प्रत्ययाः सोदाहरणं स्पष्टीक्रियन्ते । यथा –

**सत्यम्** – मानवमूल्येषु आद्यं सर्वोत्कृष्टं च मूल्यं नाम सत्यमेव । समानता प्रामाणिकता, जिज्ञासा, **ज्ञाना**नुरागः, तर्कः, आशावादः इत्यादीनि सत्यस्यैव उपमूल्यानि सन्ति । सत्यमेव मानवस्य बौद्धिकपक्षं सर्वात्मना प्रभावयति । अत एव शान्तिपर्वणि "सर्वं सत्ये प्रतिष्ठितम्" इत्युक्तम् । सत्यवचनं सर्वोत्कृष्टं लोकस्थितिकारकमित्यपि तत्रैव उक्तम् । तद्यथा –

सत्यस्य वचनं साधु न सत्याद्विद्यते परम् ।
सत्येन विधृतं सर्वं सर्वं सत्ये प्रतिष्ठितम्[1] ॥

सत्यं स्वर्गस्यापि सोपानमस्तीत्यतः सत्यं वदत मासत्यमिति महाभारतं निर्दिशति । परन्तु सत्यज्ञानं न सुकरमस्ति । किं नाम सत्यम् ? इत्यस्यापि उत्तरं वयं महाभारतादेव विज्ञातुं शक्नुमः । सर्वभूतकल्याणकृदेव सत्यमिति सुस्पष्टमुक्तमस्ति तत्र । यथा –

सत्यस्य वचनं श्रेयः सत्यज्ञानं तु दुष्करम् ।
यद्भूतहितमत्यन्तमेतत् सत्यं ब्रवीम्यहम्[2] ॥

सत्येन असत्यं स्वतः एव निर्गच्छति । यथा शान्तचित्तेन क्रोधः जेतुं शक्यः, सदाचारेण दुर्जनः वारयितुं शक्यः यथा वा दानेन कृपणतां दूरीकर्तुं प्रभवामः तथैव सत्येनैव असत्यत्मपि समूलमुत्पाटयितुं शक्नुमः । यथोक्तम् उद्योगपर्वणि –

अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत् ।
जयेत् कदर्थं दानेन जयेत् सत्येन चानृतम्[3] ॥

सत्यमेव सतां व्रतमित्युपदिशति महाभारतम् । किञ्च सत्यमार्गस्य अनुसरणेन के के लाभाः संभवन्ति इत्यत्र ये दृष्टान्ताः अत्र परिकल्पिताः सन्ति न तथा इतरेषु वाङ्मयेषु । अतः सत्यस्य वास्तविकसमीक्षणाय महाभारतमनुसन्धेयमेव ।

**प्रेम** - "वसन्ति हि प्रेम्णि गुणा न वस्तुनि" इति कालिदासीयं वचः। सद्गुणाः भगवत्प्रेमसंपादनहेतवः सन्ति । महाभारते भीष्मपर्वणि भगवद्भक्तनिरूपणप्रसङ्गे साक्षात्भगवता एव उक्तं यत्–

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः[4] ॥

अस्मिन् श्लोके स्वार्थरहितस्य निष्कल्मषप्रेम्णः वर्णनं कृतं वर्तते । अत्रेदमवश्यं विज्ञेयं यत् लोकप्रेम प्रीतिरिति भगवत्प्रेम भक्तिरिति व्यवह्रियते शास्त्रेषु इति । षड्विधं प्रीतिलक्षणमिति पञ्चतन्त्रेऽपि उक्तमेव । तद्यथा –

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्[5] ॥
प्रेम एव प्रियमिति वेदेष्वपि उक्तचरमेव ।
यथा अथर्ववेदे–
प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु ।
प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये[6] ॥

सर्वभुतेषु समभाव एव प्रेम्णः वास्तविकं रूपं वर्तते । तत्तादृशगुणोपेतः एव भक्तः इति उच्यते । भक्त एव भगवत्प्रियः भवति नान्यः । तस्य लक्षणान्यपि उक्तान्येव । तद्यथा –

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः[7] ॥

मित्रता कारुण्यम् अहंकारराहित्यम् ममकारराहित्यम् इत्यादीनि प्रेम्णः उपमूल्यानि सन्ति । प्रेम्णा एव ऐक्यभावः समुदेति । अत एव Love is God इत्यपि आभाणकं श्रूयते । प्रेम्णः उद्भवेन

मानवः स्वार्थरहितः सहयोगबुद्धिश्च भवति । अतः एव आधारभूतेषु मानवीयमूल्येषु प्रेम्णः प्राथम्यमुपकल्पितमस्तीति फलितम् ।

**शान्तिः** – सहनशीलता, तत्पर**रता**, प्रसन्नता, विनम्रता,धारणपटुता इत्यादीनि शान्तेः उपमूल्यानि सन्ति । शान्तेरभावे मानवः अशान्तः जायते । अशान्तस्य कुतः सुखम् । अतः मानवजीवने शान्तेः प्राप्तिः अनिवार्या एव । शान्त्या एव प्रसन्नता समुपजायते। क्रियाशीलता समभिवर्धते । पुनः मानवे धनात्मकदृष्टिः विकसिता भविष्यति । मानवे परिदृश्यमाना अशान्तिः नूनं तत्परिवारं प्रभावयति । अशान्तः परिवारः समुदायं समाजञ्च प्रभावयति । अत एव अद्यत्वे राष्ट्रशान्तेः विश्वशान्तेश्च विषये आधुनिकेषु महती आस्था परिदृश्यते । शैक्षिकपाठ्यक्रमेष्वपि "शान्तिशिक्षा" इत्याख्यः विषयविशेषः सन्निहितो वर्तते । एवं शान्तेः महत्त्वमपरिहार्यमेव । शान्तेः क्रियारूपमस्ति शमः । "शममेव परं मन्ये शमात् क्षेमं भवेन्मम" इतीदं श्लोकवाक्यमपि सभापर्वणि श्रूयते । ज्ञानध्यानतपादिभिः मानवः शमान्वितः भवति । तत्र **हि** षड्रसास्वादनक्षामस्ति आस्माकीना रसना । परन्तु शान्तैकरसास्वादात् अतीन्द्रिया तृप्तिर्जायते मानवेषु । किञ्च शमेनैव तन्नम शान्त्या एम मानवः इन्द्रियनिग्रहक्षमः भविष्यति । न केवलं पञ्चेन्द्रियनिग्रहेण शान्ति**रु**पलभ्यते । एतदर्थं षष्ठस्यापि इन्द्रियस्य तन्नाम मनसः निग्रहणं कार्यम् । मनसः निग्रहेण मानवः शमान्वितः सन् सिद्धिमवाप्नोति । शम एव सर्वसिद्धिकारकः इति आदिपर्वणि अपि उक्तमेव । तद्यथा –

शम एव यतीनां हि क्षमिणां सिद्धिकारकः ।
क्षमावतामयं लोकः परश्चैव क्षमावताम् [8] ॥

विषयविरक्तिः वासनापरित्या**गो** वा शमसाधनहेतुरस्ति । किञ्च धर्मसङ्ग्रहमूलमपि शम एव इत्यपि महाभारते उक्तमेव । तद्यथा –

शमस्तु परमो धर्मः प्रवृत्तः सत्सु नित्यशः ।
गृहस्थानां विशुद्धानां धर्मस्य निचयो महान् [9] ॥

**अहिंसा** – अहिंसा धर्माय हिंसा च अधर्माय कल्पते इति सर्वलोकसामान्यः विचारः । अतः एव अहिंसा ज्यायसी इति महाभारतेऽपि उक्तमेव । न केवलं कायेन अपि तु वचसा मनसा वापि हिंसा न कार्या । मनोवाक्कायैः यः इतरान् न हिंसयति सः इतरप्राणिभ्योऽपि हिंसतो न भवति । अतः त्रिकरणशुद्धिरनिवार्या। यथोक्तं शान्तिपर्वणि-

न हिंसयति यो जन्तून् मनोवाक्कायहेतुभिः ।
जीवितार्थापनयनैः प्राणिभिर्न स हिंस्यते [10] ॥

अहिंसैव सकलधर्ममूलमित्यतः अहिंसा परमो धर्मः इत्येव जोघुष्यते । यथोक्तं तत्र –

अहिंसा परमो धर्मस्तथाहिंसा परं तपः ।
अहिंसा परमं सत्यं यतो धर्मः प्रवर्तते [11] ॥

अहिंसैव सर्वश्रेष्ठः यज्ञः तेनैव च महत्फलमपि लभ्यते इति अनुशासने उक्तम् । तद्यथा –

अहिंसा परमो यज्ञस्तथाहिंसा परमं फलम् ।
अहिंसा परमं मित्रमहिंसा परमं सुखम् 12 ॥

अहिंस्रस्य मनुजविशेषस्य तपादिकं न कदापि विनश्यति । किञ्च सः मातापितरौ इव सर्वत्र पूज्यस्थानं विन्दतीत्यपि तत्रैव उक्तम् । तद्यथा –

अहिंस्रस्य तपोऽक्षय्यमहिंस्रो भजते सदा ।
अहिंस्रः सर्वभूतानां यथा माता तथा पिता [13] ॥

धर्मशास्त्रेऽपि अहिंसायाः श्रेष्ठं स्थानं कल्पितमस्तीत्यपि तत्रैव लिखितमस्ति । यथा –

अहिंसा परमो धर्मो ह्यहिंसा परमं सुखम् ।
अहिंसा धर्मशास्त्रेषु सर्वेषु परमं पदम् [14] ॥

एवं महाभारते साद्यन्तं वयं अहिंसायाः वैशिष्ट्यं द्रष्टुं शक्नुमः । महाभारतयुद्धं यद्यपि प्रवृत्तं तथापि "मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्" इतीदं भगवद्वचनं अत्र अवश्यं स्मर्तव्यमेव ।

**धर्मः** - धर्मद्वारप्रवेशाय अहिंसा, समता, शान्तिः दया इत्यादीनि अनिवार्याणि । अहिंस्रः, समदृष्टिः, शान्तः, दयापरश्च मानवः एव धर्ममश्नुते नान्यः । यथोक्तं वनपर्वणि-

अहिंसा समता शान्तिरानृशंस्यममत्सरः ।
द्वारेण्येतानि मे विद्धि प्रियो ह्यसि सदा मम [15] ॥

एवद्वचनं युधिष्ठिरम् उद्दिश्य उक्तमस्ति । युधिष्ठरस्तु धर्मपरायणः धर्मराजश्चेति प्रसिद्धः आसीत् । एवमत्र महाभारते आदर्शपुरुषचित्रणेन धर्मस्य माहात्त्म्यम् उपवर्णितमस्ति । धर्मत्यागेन अर्थग्रहणेन च अधर्मः अनर्थश्च भविष्यतीति द्रोणपर्वणि अपि उक्तमेव । तद्यथा –

यो हि धर्मं परित्यज्य भवत्यर्थपरो नरः ।
सोस्माच्च हीयते लोकात् क्षुद्रभावं च गच्छति [16] ॥

धर्मावलम्बनेन धार्मिकः इह लोके परलोके च सुखं विन्दति । सकलकल्याणमूलोऽयं धर्मः इत्यपि तत्रैव उक्तम् । तद्यथा –

धर्मापेक्षी नरो नित्यं सर्वत्र लभते सुखम् ।
प्रेत्यभावे च कल्याणं प्रसादं प्रतिपद्यते [17] ॥

यत्र धर्मः निवसति तत्र कृष्णः निवसति, यत्र कृष्णः निवसति तत्र धर्मोऽपि स्वत एव निवसति इति भीष्मपर्वणि उक्तम् । यथा –

यत्र धर्मो द्युतिःकान्तिर्यत्र ह्रीः श्रीस्तथा मतिः ।
यतो धर्मस्ततः कृष्णो यत्र कृष्णस्ततो जयः [18] ॥

यत्र धर्मः निवसति तत्रैव समाजोऽपि सुखेन निवसति । धर्मरहिते तन्नाम मानवमूल्यरहिते समाजे सर्वदा अनर्था एव जायन्ते । मूल्यरहितसमाजोऽपि शीघ्रमेव विनश्यति । यथा उक्तम् –

धर्मे वर्धति वर्धन्ति सर्वभूतानि सर्वदा ।
तस्मिन् ह्रसति ह्रीयन्ते तस्माद् धर्मं न लोपयेत् [19] ॥

एवं महाभारतमहाकाव्ये पञ्चानामपि मानवीयमूल्यानां विस्तरेण वर्णनं कृतं दृश्यते । विशिष्य आधुनिककाले मूल्यशिक्षायै प्राथम्यं दीयते । परन्तु मूल्याधारितशिक्षा कथं वर्तते इति वयम् अस्मिन् महाकाव्ये साक्षादवलोकयितुं शक्नुमः । एतेषां मूल्यसम्बद्धानां श्लोकरूपाणां विचाराणां पाठ्यक्रमेषु सन्निवेशः अवश्यं कर्तव्यः । अनेन मूल्याधारितसमाजस्य निर्माणं कर्तुं शक्नुमः । किञ्च लोके विश्वबन्धुत्वभावनायाः जागरणाय लोकोद्धाराय च इमानि मानवीयमूल्यानि नूनम् उपकुर्वन्ति । अतः मानवीयमूल्यानां विषये महाभारतादिषु सन्निहितानां विचाराणां विषये गभीरमनुसन्धानमवश्यं कर्तव्यमिति शिवम् ।

## संदर्भ ग्रन्थसूची


1. महाभारतम् – सुभाष विद्या अलंकार, प्रतिभा प्रकाशन, नई दिल्ली (2009)
2. शान्तिपर्वणि 259/10
3. शान्तिपर्वणि 289/20
4. उद्योगपर्वणि 3.9/72
5. भीष्मपर्वणि 36/19, गीतायाम् 12/19

6. पञ्चतन्त्रे 2/49
7. अथर्ववेदे –19/62
8. भीष्मपर्वणि 36-13/14, गीतायाम् 12-13/14
9. आदिपर्वणि 42/9
10. महाभारते 141 /70
11. शान्तिपर्वणि 175/27
12. अनुशासने -115-231
13. अनुशासने – 116/29
14. अनुशासने – 116/31
15. अनु. दा.पा 145
16. वनपर्वणि
17. द्रोणपर्वणि 24/14
18. द्रोणपर्वणि – 85/31
19. भीष्मपर्वणि – 23/28
20. शान्तिपर्वणि 90/17
21. भारतीय वाङ्मय कोष (P.134, 138) – निर्मला प्रकाशन, जयपुर, राजस्थान (1997)।
22. मूल्यशिक्षा (P. 101 to 105) – दत्ताराम पाठक, विनोद पुस्तक मंदिर, आगरा (2005)।